# प्रहेलिकाः

(1)

अपदो दूरगामी च, साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च, वो जानाति स पण्डितः ।।

(2)

न तस्यादिः, न तस्यान्तः मध्ये यः तस्य तिष्ठसि ।
तवाप्यस्ति ममाप्यस्ति, यदि जानासि तद् वद ।।

(3)

तातेन कथितं पुत्र, लेखमेकं लिखाधुना ।
न तेन लिखिता लेखः, पितुराज्ञा न लंघिता ।।

(4)

कृष्णानना न मार्जारी, द्विजिह्वा न च सर्पिणी ।
पञ्चभर्त्री न पाञ्चाली, यो जानाति स पण्डितः ।।

(5)

वृक्षाग्रवासी न च पक्षिराजः,
त्रिनेत्रधारी न च शूलपाणिः ।।
त्वग्वस्त्र-धारी न च सिद्धयोगी,
जलं च बिभ्रन्न घटो न मेघः ।।

(6)

वृक्षाग्रवासी न च पक्षिराजस्तृणं च शय्या न च राजयोगी ।
सुवर्णकायो न च हेमधातुः पुंसश्च नाम्ना न च राजपुत्रः ।।

©BSTBPC
NOT TO BE PUBLISHED

(7)

नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता ।
अमुखी कुरुते शब्दं जातमात्रा विनश्यति ।।

(8)

वने वसति को वीरो योऽस्थिमांसविवर्जितः ।
असिवत् कुरुते कार्यं कार्यं कृत्वा वनं गतः ।।

(9)

चक्री त्रिशूली न हरिर्न शम्भुः
महान् बलिष्ठो न च भीमसेनः ।
स्वच्छन्दचारी नृपतिर्न योगी
सीतावियोगी न च रामचन्द्रः ।

(10)

केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः ।
रुदन्ति कौरवास्तत्र हा हा केशव केशव ।।

(11)

रेफ आदौ मकारोऽन्ते वाल्मीकिर्यस्य गायकः ।
सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रियः ।।

(12)

एको ना विंशतिः स्त्रीणां स्नातुं हि यमुनां गताः ।
विंशतिः पुनरायाता एको नक्रेण भक्षितः ।।

(13)

शस्त्रं नखलु नेष्यामि- इत्थमुक्त्वा रणे गतः ।
तदेव शस्त्रं कृतवान् स्वप्राणं च ररक्ष सः ।।

(14)

स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम् ।
ज्योतिः पदार्थज्ञानार्थं कोऽहं वदतु साम्प्रतम् ।।

(15)

त्रिनेत्रोऽपि शिवो नास्मि घटो नास्मि जलान्वितः ।
कूर्चश्मश्रुयुतो नित्यं नरो नास्मि ब्रवीतु माम् ।।

(16)

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।
गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति ।।

(17)

यानस्याङ्गं हरेः शस्त्रं चिह्नं भारतभूपतेः ।
चलन्तं वर्तुलाकारं यो जानाति स पण्डितः ।।

(18)

मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वतः ।
बलिष्ठोऽस्मि च भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः ।।

(19)

नृत्यामि नित्यं धवलास्तरेषु,
संकेतिताङ्कैः प्रकटीकरोमि ।
भावं जनानां हृदयेषु गूढं
कृष्णाननाऽऽलोच्य वदन्तु काऽहम् ।।

(20)

का पाण्डुपत्नी गृहभूषणं के,
को रामशत्रुः किमगस्त्यजन्म ।
सूर्यैक-पुत्रो वद वेत्सि चेत्त्वं
कुन्ती-सुता रावणकुम्भकर्णाः ।।